# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०३ सेमेस्टर-०५** | **प्रश्नपत्रम्- ०४** | गुणाः - ७० |
| विषयः – ज्योतिषशास्त्रम् | कोड – OE-3.5.5 | समयः – ११:०० तः ०२:०० |
| दिनाङ्कः – २८/११/२०१६ | ग्रन्थः – भावकुतूहलम्, केशवीयजाकपद्धतिः | |

**प्रथमान्वितिः (युनिट- १)**

**प्रश्नः १ निम्नाङ्कितेषु द्वयोः ससन्दर्भं व्याख्या कार्या। 08**

(१) तनुकोशसहोदरबन्धुसुतारिपुकामविनाशशुभाब्धिुधैः।
पितृभं तत आप्तिरपाय इमे क्रमतः कथिता मिहिरप्रमुखैः॥

(२) खलखगसहितो निशाकरोऽयंत तनुमृतिमारगतो हि जन्मकाले
मृतिपदमुपयाति देवबालोऽपि च सकलैरवलोकितो न सौम्यैः॥

(३) यस्याः शशाङ्के जनिलग्नभे वा रामर्क्षगे सा प्रकृतिः स्थिरा स्यात्।
शुभेक्षिते रूपवती गुणज्ञा पतिप्रिया चारु विभूषणाढया।

**प्रश्नः २ कस्याप्येकस्य सविस्तरमुत्तरं यच्छत। 08**

(१) त्रिंशद्वर्षात्परं पुत्राप्तियोगस्य वर्णनं ग्रन्थानुसारं कुरुत

(२) कुलोचितराजयोगस्य सोदाहरणं वर्णनं कुरुत

**प्रश्नः ३ कस्याप्येकस्य टिप्पणी कार्या। 02**

(१) अनफायोगफलम्।

(२) शुभाशुभलक्षणकारणम्।

**प्रश्नः ४ कयोश्चिद द्वयोः अतिलघूत्तरं लिखत। 02**

(१) सूर्यादिग्रहाणां मूलात्रिकोणराशयः के सन्ति?

(२) सिंहासनयोगः कदा सम्भवति?

(३) जीवे उपदेशं गतवति (तदा) नरः कीदृशो भवति?

(४) उदारचितो जातकः कदा भवति?

**द्वितीयान्वितिः (युनिट- २)**

**प्रश्नः ५ अधोलिखितेषु कयोश्चिदद्वयोः व्याख्यां कुरुत। 08**

(१) प्रकाशने गते केतौ नेत्ररोगः प्रजायते।
दुष्टसर्यादिभीतिश्च रिपुराजकुलादपि
वित्तं विनांश्मायति गतिश्च चपला भवेत्॥

(२) मारकग्रहसम्बन्धात् पापकर्ता शनिस्तदा।
तिरस्कृत्य ग्रहान्सर्वान्निहन्ता भवति ध्रुवम्।

(३) प्रवासशाली किलदुःखशाली सदालसी धीर्धनवर्जितश्च।
भयातुरः कोपपरो विशेषाद् व्ययाधिनाथे गमने मनुष्यः॥

**प्रश्नः ६ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत** **08**

(१) शुक्रस्यावस्थाफलानि वर्णयत।

(२) अचललक्ष्मीयोगः ग्रन्थानुसारं लिखत।

**प्रश्नः ७ निम्नाङ्कितेषु टिप्पणीद्वयं लिखत।** **04**

(१) धनिकयोगः।

(२) दरिद्रयोगः।

(३) मारकत्वनिरूपणम्।

(४) भौमदशाफलम्।

**प्रश्नः ८ निम्नाङ्कितेषु पञ्चानाम् अतिलघूरं लिखत** **05**

(१) राजयोगः कदा सम्भवति ?

(२) देवतातिथिपूजकः शब्दस्यार्थः कः ?

(३) भ्रातुः सौख्यहानिः कदा भवति ?

(४) दीर्घायुयोगः कदा भवति ?

(५) मानवः कस्मिन् योगे वाहनस्वर्णरत्नानामधिपो जायते ?

(६) महोन्नतिशब्दस्यार्थः कः ?

(७) मानवः कदा विदेशे सौख्यमाप्नुयात्?

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ९ अधोलिखितेषु कमोश्चित्‌द्वयो व्याख्यां कुरुत।** **08**

(१) रात्रेः शेषमितं युत दिनदलेनह्नो गतं शेषकं विश्लेष्यं खलु पूर्वपश्चिमनतं त्रिशंच्च्युतं न्नतम्।
यत्पूर्वोन्नतषड्भयुक्तरचितः पश्चान्नतादित्यतो यल्लङ्कोदयकैश्च लग्नमिव तन्माद्यं सषडभं सुखम्।

(२) युद्धे बाणवियोगहृतखचरयोर्वीयैक्ययोरन्तरं स्वं सौम्यस्थखगे क्षेयं च यमादि क संस्थस्य कुर्याद्बले।
सदष्ट्यङ्घ्रियुगुग्रदृष्टिचरणोनं खेटवीर्यं भवत्।

(३) अंशायुश्च तनाक्रिऽधिकबले पैण्डं निसर्गं विधौ स्वोच्चेत्तुल्यबलं द्वयोर्युतिदलंतज्जायुषोश्चेत् त्रयः।
त्र्यायुंषि त्रिबलैर्निहत्य च युतिवीर्यैक्यहृदा त्रिजा युर्युत्यास्त्रिलवोऽथ जैवमुदित चेद्धीनवीर्यास्त्रयः।

**प्रश्नः १० अधोलिखितयोः कस्यचिदेकस्य वर्णनं कुरुत।** **08**

(१) नतोन्नतं सह दशम-चतुर्थभावयोगानयनम्।

(२) ग्रहाणां दिग्बलं-कालबलञ्च वर्णयत।

**प्रश्नः ११ निम्नलिखितयोः कस्यचिदेकस्य टिप्पणीं लिखत।** **04**

(१) दृष्टिसाधनविधिः (२) मुदितग्रहदशाफलम्।

(३) लग्नायुः साधनम् (४) क्षोभितग्रहदशाफलम्।

**प्रश्नः १२ अधोलिखितेषु पञ्चानाम् अतिलघूत्तरं लिखत्।** **05**

(१) भावकुतूहलग्रन्थे कति अध्यायाः सन्ति? (७) आश्रयारूपो गुणाः कदा भवन्ति?

(२) ग्रन्थकर्तुः नाम किम?

(३) भगणाच्युतः शब्दस्यार्थः कः?

(४) मध्ये द्रेष्काणे कति पादबलं भवति?

(५) विलोमशब्दस्यार्थः कः ?

(६) भावानां कति सङ्ख्या?

***